This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

Checked 2012

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M701 विषय काव्य.
नाव. गीतगोविन्दम् (mss).
लेखक/लिपीकार जयदेवरचितम्.
पृष्ठ २१ काळ — पूर्ण/~~अपूर्ण~~



क कलेवनिमग्ना ॥ केशव धृतशूकररूप जय जगदीश हरे ३ तव करकमलवरे नखमद्भुतशृंगं ॥ दलि
तहिरण्यकशिपुतनुभृंगं ॥ केशव धृतनरहरिरूप जय जगदीश हरे ४ छलयसि विक्रमणे बलिम
द्भुतवामन ॥ पदनखनीरजनितजनपावन ॥ केशव धृतवामनरूप जय जगदीश हरे ५ क्षत्रि
यरुधिरमये जगदपगतपापं ॥ स्नपयसि पयसि शमितभवतापं ॥ केशव धृतभृगुपतिरूप ज
य जगदीश हरे ६ वितरसि दिक्षु रणे दिक्पतिकमनीयं ॥ दशमुखमौलिबलिं रमणीयं ॥ केशव
धृतरामशरीर जय जगदीश हरे ७ वहसि वपुषि विशदे वसनं जलदाभं ॥ हलहतिभीति
मिलितयमुनाभं ॥ केशव धृतहलधररूप जय जगदीश हरे ८ निंदसि यज्ञविधेरहह श्रु
तिजातं ॥ सदयहृदयदर्शितपशुघातं केशव धृतबुद्धशरीर जय जगदीश हरे ९ म्लेच्छनिव
हनिधने कलयसि करवालं ॥ धूमकेतुमिव किमपि करालं ॥ केशव धृतकल्किशरीर जय जग
दीश हरे १० श्रीजयदेवकवेरिदमुदितमुदारं ॥ शृणु सुखदं शुभदं भवसारं ॥ केशव धृतदश

जंम
शविधरूपजयजगदीशहरे॥११॥वेदानुद्धरतेजगन्निवहतेभूगोलमुद्बिभ्रतेदैत्यंदारयतेबलिंछलय
तेक्षत्रक्षयंकुर्वतेपौलस्त्यंजयतेहलंकलयतेकारुण्यमातन्वतेम्लेछान्मूर्छयतेदशाकृतिकृते
कृष्णायतुभ्यंनमः॥१॥प्रभावतीरागेरूपकतालेश्रितकमलाकुचमंडलधृतकुंडल॥कलितललि ह
मडन तवनमालजयजयदेवहरे॥१॥दिनमणिमंडलनभवखंडन॥मुनिजनमानसहंसजयजयदेवरे
॥२॥कालियविषधरगंजनजनरंजन॥यदुकुलनलिनदिनेशजयजयदेवहरे॥३॥मधुमुरनर र
कविनाशनगरुडाशन॥सुरकुलकेलिनिदानजयजयदेवहरे॥४॥अमलकमलदललोचनभ
वमोचन॥त्रिभुवनभवननिधानजयजयदेवहरे॥५॥जनकसुताकृतभूषणजितदूषण॥स
मरशमितदशकंठजयजयदेवहरे॥६॥अभिनवजलधरसुंदरधृतमंदर॥श्रीमुखचंद्रचको
रजयजयदेवहरे॥७॥तवचरणेप्रणितावयमितिभावय॥कुरुकुशलंवर्णितेषुजयजयदेव
हरे॥८॥श्रीजयदेवकवेरिदंकुरुतेमुदं॥मंगलमुज्ज्वलगीतंजयजयदेवहरे॥९॥पद्मापयोध

रतटीपरिरंभलग्नकाश्मीरमुद्रितमुरोमधुसूदनस्यव्यक्तानुरागमिवखेलदनंगखेदस्वेदांबुपूर
मनुपूरयतुप्रियंवः॥१॥वसंतेवासंतीकुसुमसुकुमारैरवयवैर्भ्रमंतींकांतारेबहुविहितकृष्णानुस
रणां॥अमंदंकंदर्पज्वरजनितचिंताकुलतयावलद्बाधांराधांसरसमिदमूचेसहचरी॥२॥वसंतरा
गेरूपकताले॥ ॥ललितलवंगलतापरिशीलनकोमलमलयसमीरे॥मधुकरनिकरकरंबि
तकोकिलकूजितकुंजकुटीरे॥१॥विहरतिहरिरिहसरसवसंते॥नृत्यतियुवतिजनेनसमं
सखिविरहिजनस्यदुरंते॥ध्रु॥उन्मदमदनमनोरथपथिकवधूजनजनितविलापे॥अलिकुल
संकुलकुसुमसमूहनिराकुलबकुलकलापे॥२॥मृगमदसौरभरभसवशंवदनवदलमाल
तमाले॥युवजनहृदयविदारणमनसिजनखरुचिकिंशुकजाले॥३॥मदनमहीपतिकनकदंडरु
चिकेशरकुसुमविकासे॥मिलितशिलीमुखपाटलिपटलकृतस्मरतूणविलासे॥४॥विगलितलज्जि
तजगदवलोकनतरुणकरुणकृतहासे॥विरहिणीकृंतनकुंतमुखाकृतिकेतकिदंतुरितासे॥५

३

माधविकापरिमलललिते नवमालिकयातिसुगंधौ ॥ मुनिमनसामपि मोहनकारिणि तरुणा
कारणबंधौ ॥६॥ स्फुरदतिमुक्तलतापरिरंभणमुकुलितपुलकितचूते वृंदावनविपिने परि
सरपरिगतयमुनाजलपूते ॥७॥ श्रीजयदेवणितमिदमुदयति हरिचरणस्मृतिसारं ॥ सरस भ
वसंतसमयवनवर्णनमनुगतमदनविकारं ॥८॥ दरविगलितमल्लीवल्लिचंचत्परागप्रक
टितपटवासैर्वासयन्काननानि ॥ इह हि दहति चेतः केतकीगंधबंधुः प्रसरदसमबाणःप्रा
णवद्गंधवाहः ॥१॥ उन्मीलन्मधुगंधलुब्धमधुपव्याधूतचूतांकुरक्रीडत्कोकिलकाकलीकल
कलैरुद्गीर्णकर्णज्वराः ॥ नीयंते पथिकैः कथंकथमपि ध्यानावधानक्षणः प्राप्तप्राणसमास
मागमरसोल्लासैरमी वासराः ॥२॥ अन्योत्संगवसद्भुजंगकवलक्लेशादिवेशाचलं प्रालेयप्ल
वनेच्छयानुसरति श्रीखंडशैलानिलः ॥ किंचितस्निग्धरसालमौलिमुकुलान्यालोक्य हर्षोद
यादुन्मीलंति कुहूः कुहूरिति कलोत्तालाः पिकानां गिरः ॥३॥ अनेकनारीपरिरंभसंभ्रमस्फुरन्म

नोहारिविलासलालसं ॥ मुरारिमाराद्उपदर्शयंत्यसौ सखी समक्षं पुनराह राधिकां ॥४॥ राम
करीरागे यतिताले ॥ चंदनचर्चितनीलकलेवरपीतवसनवनमालि ॥ केलिचलन्मणिकुंडलमं
डितगंडयुगस्मितशाली ॥१॥ हरिरिह मुग्धवधूनिकरे ॥ विलासिनि विलसति केलिपरे ॥ ध्रु ॥ पी
नपयोधरभारभरेण हरिं परिरंभ्य सरागं ॥ गोपवधूरनुगायति काचिदुदंचितपंचमरागं ॥
२॥ कापि विलासविलोलविलोचनखेलनजनितमनोजं ॥ ध्यायति मुग्धवधूरधिकं मधुसू
दनवदनसरोजं ॥३॥ कापि कपोलतले मिलिता लपितुं किमपि श्रुतिमूले ॥ चारु चुचुंब नितं
बवती दयितं पुलकैरनुकूले ॥४॥ केलिकलाकुतुकेन च काचिदमुं यमुनाजलकूले ॥ मंजुलवंजुल
कुंजगतं विचकर्ष करेण दुकूले ॥५॥ करतलतालतरलवलयावलिकलितकलस्वनवंशे ॥ रास
रसे सहनृत्यपरा हरिणा युवतिः प्रशशंसे ॥६॥ श्लिष्यति कामपि चुंबति कामपि कामपि रमय
ति रामां ॥ पश्यति सस्मितचारुपरामपरामनुगच्छति वामां ॥७॥ श्रीजयदेवभणितमिदमद्भुत

५

केशवकेलिरहस्यं ॥ रंद्यावनविपिनेचरितंवितनोतुशुभानियशस्यं ॥ ८ ॥ विश्वेषामनुरंजनेन
जनयन्नानंदमिंदीवरश्रेणीश्यामलकोमलैरुपनयन्नंगैरनंगोत्सवं ॥ स्वच्छंदंव्रजसुंदरीभिरभि
तःप्रत्यंगमालिंगितःशृंगारःसखिमूर्त्तिमानिवमधौमुग्धोहरिःक्रीडति ॥ १ ॥ रासोल्लाससभरे
णविभ्रमभृतामाभीरवामभ्रुवामभ्यर्णेपरिरभ्यनिर्भरमुरःप्रेमांधयाराधया ॥ साधुत्वद्वद
नंसुधामयमितिव्याहृत्यगीतस्तुतिव्याजादुद्भटचुंबितस्मितमनोहारीहरिःपातुवः ॥ इ
तिश्रीगीतगोविंदेजयदेवकृतौसामोददामोदरोनामप्रथमःसर्गः ॥ १ ॥ विहरतिवनेराधासाधारण
प्रणयेहरौविगलितनिजोत्कर्षादीर्ष्यावशेनगतान्यतः ॥ क्वचिदपिलताकुंजेगुंजन्मधुव्रतमं
डलीमुखरशिखरेलीनादीनाप्युवाचरहःसखीं ॥ १ ॥ गुर्जरीरागेरूपकताले ॥ संचरदधरसुधाम
धुरध्वनिमुखरितमोहनवंशं ॥ चलितदृगंचलचंचलमौलिकपोलविलोलवतंसं ॥ १ ॥ रासे
हरिमिहविहितविलासं ॥ स्मरतिमनोममकृतपरिहासं ॥ ध्रु ॥ चंद्रकचारुमयूरशिखंड

सत्न डकमंडलवलयितकेशं ॥ ध्रुं वंजुलकुंजगतंविचकर्षकरेणदुकूले ॥ प्रचुरपुरंदरधनुरनुरंजितमेदु
हरस्त रसुवेशं ॥ २ ॥ गोपकदंबनितंबवतीमुखचुंबनलंभितलोभं ॥ बंधुजीवमधुराधरपल्लवमुल्ल
[illegible]सितस्मितशोभं ॥ ३ ॥ विपुलपुलकभुजपल्लववलयितवल्लवयुवतिसहस्रं ॥ क
रचरणोरसिमणिगणभूषणकिरणविभिन्नतमिस्रं ॥ ४ ॥ जलदपटलचलदिंदुविनिंदक
न न चंदनतिलकललाटं ॥ पीनपयोधरपरिसरमर्दननिर्दयहृदयकपाटं ॥ ५ ॥ मणिमयमकर
मनोहरकुंडलमंडितगंडमुदारं ॥ पीतवसनमनुगतमुनिमनुजसुरासुरवरपरिवारं ॥
६ ॥ विशदकदंबतलेमिलितंकलिकलुषभयंसमयंतं ॥ मामपिकिमपितरंगदनंगदृ
शामनसारमयंतं ॥ ७ ॥ श्रीजयदेवभणितमतिसुंदरमोहनमधुरिपुरूपं ॥ हरिचरणस्म
रणंप्रतिसंप्रतिपुण्यवतामनुरूपं ॥ ८ ॥ गणयतिगुणग्रामंभ्रामंभ्रमादपिनेहतेवहतिच
परितोषंदोषंविमुंचतिदूरतः ॥ युवतिषुवलत्तृष्णेकृष्णेविहारिणिमांविनापुनरपिमनोवा

गी॥

मं कामं करोति करोमि किं ॥ १ ॥ मा॥ लवगौडीएकताली॥ निभृतनिकुंजगृहं गतया निशि रह
सि निलीय वसंतं ॥ चकितविलोकितसकलदिशा रतिरभसरसेन हसंतं ॥ १ ॥ सखि हे केशिम
थनमुदारं ॥ रमय मया सह मदनमनोरथभावितया सविकारं ॥ ध्रु॥ प्रथमसमागमलज्जि
तया पटुचाटुशतैरनुकूलं ॥ मृदुमधुरस्मितभाषितया शिथिलीकृतजघनदुकूलं ॥ २ ॥ कि
शलशयननिवेशितया चिरमुरसि ममैव शयानं ॥ कृतपरिरंभणचुंबनया परिरभ्य कृता
धरपानं ॥ ३ ॥ अलसनिमीलितलोचनया पुलकावलिललितकपोलं ॥ श्रमजलसिक्तकलेवर
या वरमदनमदादतिलोलं ॥ ४ ॥ कोकिलकलरवकूजितया जितमनसिजतंत्रविचारं ॥ श्लथकु
सुमाकुलकुंतलया नखलिखितघनस्तनभारं ॥ ५ ॥ चरणरणितमणिनूपुरया परिपूरितसुर
तवितानं ॥ मुखरविशृंखलमेखलया सकचग्रहचुंबनदानं ॥ ६ ॥ रतिसुखसमयरसालस
या दरमुकुलितनयनसरोजं ॥ निःसहनिपतिततनुलतया मधुसूदनमुदितमनोजं ॥ ७ ॥ श्रीज

यदेवभणितमिदमतिशयमधुरिपुनिधुवनशीलं ॥ सुखमुत्कंठितगोपवधूकथितं वितनो
तु सलीलं ॥ ८ ॥ हस्तस्रस्तविलासवंशमनृजुभ्रूवल्लि मद्बल्लवीवृंदोत्सारिदृगंतवीक्षितमति
स्वेदार्द्रगंडस्थलं ॥ मामुद्वीक्ष्य विलज्जितं स्मितसुधामुग्धाननं कानने गोविंदं व्रजसुंदरीग
णावृतं पश्यामि हृष्यामि च ॥ १ ॥ दूरालोकस्तोकस्तवकनवकाशोकलतिकाविकाशः कासारोप
वनोपि व्यथयति ॥ अपि भ्राम्यद्भृंगीरणितरमणीया न मुकुलप्रसूतिश्चूतानां सखि शिखरि
णीयं सुखयति ॥ २ ॥ साकूतस्मितमाकुलाकुलगलद्धम्मिल्लमुल्लासितभ्रूवल्लीकमलीकदर्शि
तभुजामूलार्द्धदृष्टस्तनं ॥ गोपीनां निभृतं निरीक्ष्य गमितकांक्षश्चिरं चिंतयन्नंतर्मुग्धमनोहरो
हरतु वः क्लेशं नवकेशवः ॥ ३ ॥ इति श्रीगीतगोविंदे अक्लेशकेशवो नाम द्वितीयः सर्गः ॥ २ ॥
कंसारिरपि संसारवासनाबद्धशृंखलां ॥ राधामाधाय हृदये तत्याज व्रजसुंदरीः ॥ १ ॥ इतस्ततस्ताम
नुसृत्य राधिकामनंगबाणव्रणखिन्नमानसः ॥ कृतानुतापः स कलिंदनंदिनीतटांतकुंजे विषसा

६

दमाधवः २ गुर्जरीरागेयतिताले मामीयंचलिताविलोक्यवृतंवधूनिचयेन सापराधतयामया
ननिवारितातिभयेन १ हरिहरिहतादरतयागतासाकुपितेव ध्रु किंकरिष्यतिकिंवदिष्य
तिसाचिरंविरहेण किंधनेनजनेनकिंममकिंसुखेनगृहेण २ चिंतयामितदाननंकुटिलभ्रू
कोपभरेण शोणपद्ममिवोपरिभ्रमताकुलंभ्रमरेण ३ तामहंहृदिसंगतामनिशंरमयामि
किंवनेनुसरामितामिहकिंवृथाविलपामि ४ तन्विखिन्नमसूययाहृदयंतवाकलयामि तन्न
वेद्मिकुतोगतासिनतेनतेनुनयामि ५ दृश्यसेपुरतोगतागतमेवमेविदधासि किंपुरेवससं
भ्रमंपरिरंभणंनददासि ६ क्षम्यतामपरंकदापितवेदृशंनकरोमि देहिसुंदरिदर्शनंमम
मन्मथेनदुनोमि ७ वर्णितंजयदेवकेनहरेरिदंप्रणतेन किंदुबिल्वसमुद्रसंभवरोहिणी
रमणेन ८ भ्रूपल्लवंधनुरपांगतरंगितानिबाणागुणाःश्रवणपालिरितिस्मरेण तस्या
मनंगजयजंगमदेवतायामस्त्राणिनिर्जितजगंतिकिमर्पितानि १ हृदिबिसलताहारोना

मा

रुपा

तविरहव्याधिःकथंवर्द्धते ५ तिर्यक्कंठविलोलमौलितरलोत्तंसस्यवंशो उ८
यंभुजंगमनायकः कुवलयदलश्रेणीकंठेनसागरलद्युतिः मलयजरजोनेदंभस्मप्रि
यारहितेमयिप्रहरणाहरभ्रांत्यानंगक्रुधाकिमुधावसि २ पाणौमाकुरुचूतसायकममुं
चापमारोपयक्रीडानिर्जितविश्वमूर्छितजनाघातेनकिंपौरुषं तस्याएवमृगीदृशोमनसि
जप्रेंखत्कटाक्षाशुगश्रेणीजर्जरितंमनागपिमनोनाद्यापिसंधुक्ष्यते ३ भ्रूचापेनिहि
तःकटाक्षविशिखोनिर्मातुमर्मव्यथां श्यामात्माकुटिलःकरोतुकबरीभारोपिमारोद्यमं
मोहंतावदयंचतन्वितनुतांबिंबाधरोरागवान्सद्वृत्तस्तनमंडलस्तवकथंप्राणैर्ममक्री
डति ४ तानिस्पर्शसुखानितेचतरलास्निग्धादृशोर्विभ्रमास्तद्वक्त्रांबुजसौरभंसचसुधा
स्यंदीगिरांवक्रिमा साबिंबाधरमाधुरीतिविषयासंगेपिचेन्मानसंतस्यांलग्नसमाधिहं
[illegible]च्चरद्गीतस्थानकृतावधानललनालक्षैर्नसंलक्षिता सम्मुग्धेमधुसूदनस्यमधुरेरा
धामुखेंदौमृदुस्पंदंकंदलिताश्चिरंदधतुवःक्षेमंकटाक्षोर्मयः ६ ३ इतिश्रीगीतगोविंदेमु

ग्धमधुसूदनो नाम तृतीयः सर्गः ॥३॥ यमुनीतीरवानीरनिकुंजे मंदमास्थितं ॥ प्राह प्रेमभरोद्भ्रां
तं माधवं राधिकासखी ॥१॥ कर्णाटरागेण एकतालीतालेन ॥ निंदति चंदनमिंदुकिरणमनुविंदति खेद
मधीरं ॥ व्यालनिलयमिलनेन गरलमिव कलयति मलयसमीरं ॥ सा विरहे तव दीना ॥ माधव
मनसिजविशिखभयादिव भावनया त्वयि लीना ॥ ध्रु ॥ अविरतनिपतितमदनसरादिवभ
वदवनाय विशालं ॥ स्वहृदयमर्मणि वर्म करोति सजलनलिनीदलजालं ॥२॥ कुसुमविशिख
शरतल्पमनल्पविलासकलाकमनीयं ॥ व्रतमिव तव परिरंभसुखाय करोति कुसुमशयनी
यं ॥३॥ वहति च वलितविलोचनजलधरमाननकमलमुदारं ॥ विधुमिव विकटविधुंतुददंत
दलनगलितामृतधारं ॥४॥ विलिखति रहसि कुरंगमदेन भवंतमसमशरभूतं ॥ प्रण
म मतिकं[illegible]र मधो विनिधाय करे च शरं नवचूतं ॥५॥ प्रतिपदमिदमपि निगदति माधव
तव चरणे पतिताहं ॥ त्वयि विमुखे मयि सपदि सुधानिधिरपि तनुते तनुदाहं ॥६॥ ध्यानल

येन पुरः पुरिकल्प्यभवंतमतीव दुरापं ॥ विलपति हसति विषीदति रोदिति चंचति मुंचति तापं
॥७॥ श्रीजयदेवभणितमिदमधिकं यदि मनसा नटनीयं ॥ हरिविरहाकुलवल्लवयुवतिसखी
वचनपठनीयं ॥ आवासो विपिनायते प्रियसखीमालापि जालायते ॥ तापोपि श्वसितेन दावद
हनज्वालाकलापायते ॥ सापि त्वद्विरहेण हंत हरिणीरूपायते हा कथं कंदर्पोपि यमायते
विरचयन् शार्दूलविक्रीडितं ॥१॥ देशाखरागेण एकतालीतालेन ॥ स्तनविनिहितमपि हारमुदारं ॥ सा म
नुते कृशतनुरतिभारं ॥१॥ राधिका विरहे तव केशव ॥ ध्रु ॥ सरसमसृणमपि मलयजपंकं ॥
पश्यति विषमिव वपुषि सशंकं ॥२॥ श्वसितपवनमनुपमपरिणाहं ॥ मदनदहनमिव वह
ति सदाहं ॥३॥ दिशि दिशि किरति सजलकणजालं ॥ नयननलिनमिव विगलितनालं ॥४॥ न
यनविषयमपि किसलयतल्पं ॥ कलयति विहितहुताशनकल्पं ॥५॥ त्यजति न पाणितलेन
कपोलं ॥ बालशशिनमिव सायमलोलं ॥६॥ हरिरिति हरिरिति जपति सकामं ॥ विरहविहितम

८

रणे वनिकामं ॥ ७ ॥ श्रीजयदेवभणितमिति गीतं ॥ सुखयतु केशवपदमुपनीतं ॥ ८ ॥ सारो मां च ति
रस्करोति विलपत्युत्कंपते ताम्यति ध्यायत्युद्भ्रमति प्रमीलति पतत्युद्याति मूर्छत्यपि ॥ एताव
त्यतनुज्वरे वरतनुर्जीवेन्न किं ते रसात्स्वर्वैद्यप्रतिम प्रसीदसि यदि त्यक्तोन्यथा हस्तक ॥ १ ॥ स्मरातुरां
दैवतवैद्यहृद्य त्वदंगसंगामृतमात्रसाध्यां ॥ विमुक्तबाधां कुरुषे न राधामुपेंद्र वज्रादपि दारुणो
सि ॥ २ ॥ कंदर्पज्वरसंज्वरातुरतनोराश्चर्यमस्याश्चिरं चेतश्चंदनचंद्रमाःकमलिनीचिंतासु संताम्य
ति ॥ किंतु क्लांतिरसेन शीतलतरं त्वामेकमेव प्रियं ध्यायंती रहसि स्थिता कथमपि क्षीणा क्षणं प्रा
णिति ॥ ३ ॥ क्षणमपि विरहः पुरा न सेहे नयननिमीलनखिन्नया यया ते ॥ श्वसिति कथमसौ र
सालशाखां चिरविरहेण विलोक्य पुष्पिताग्रां ॥ ४ ॥ वृष्टिव्याकुलगोकुलावनरसादुद्धृत्य गोव
र्द्धनं बिभ्रद्वल्लववल्लभाभिरधिकानंदाच्चिरं चुंबितः ॥ दर्पेणेव तदर्पिताधरतटीसिंदूरमुद्रां
कितो बाहुर्गोपतनोस्तनोतु भवतां श्रेयांसि कंसद्विषः ॥ ५ ॥ इति श्रीगीतगोविंदे जयदेवक

भवति नवगुणभणने ललितयुवतिलीना ॥ नुदति च सखि मरणे तव दर्शनलीना ५ स्फुरति विरहहसने समलममल
माले ॥ गायति रमणध्यायने अनिलेव जलदनीले ६ पत्र्यलिजलजनयने नय पथि समान ॥ मनसि कलित विर
तो विमुग्धमाधवो नाम चतुर्थः सर्गः ॥ अहमिह निवसामि याहि राधामनुनय मद्वचनेन चानयेथा
इति मधुरिपुणा सखी नियुक्ता स्वयमिदमेत्य पुनर्जगाद राधां ॥ १ ॥ वराडीरागे मंठमताले ॥
वहति मलयसमीरे मदनमुपनिधाय ॥ स्फुटति कुसुमनिकरे विरहिहृदयदलनाय ॥ १ ॥ तव वि
रहे वनमाली सखि सीदति ॥ ध्रु ॥ दहति शिशिरमयूखे मरणमनुकरोति ॥ पतति मदनविशिखे
विलपति विकलतरोति ॥ २ ॥ ध्वनति मधुपसमूहे श्रवणमपि दधाति ॥ मनसि वलित विरहे निशि
रुजमुपयाति ॥ ३ ॥ वसति विपिनविताने त्यजति ललितधाम ॥ लुठति धरणिशयने बहु विलपति
तव नाम ॥ ४ ॥ भणति कविजयदेवे विरहिविलसितेन ॥ मनसि रभसविभवे हरिरुदयतु सुकृतेन ॥
॥ ५ ॥ पूर्वं यत्र समं त्वया रतिपतेरासादिताः सिद्धयस्तस्मिन्नेव निकुंजमन्मथमहातीर्थे पुनर्मा
धवः ॥ ध्यायंस्त्वामनिशं जपन्नपि तवैवालापमंत्राक्षरं भूयस्त्वत्कुचकुंभनिर्भरपरीरंभामृतं
वांछति ॥ १ ॥ गुर्जरीरागे एकताले रतिसुखसारे गतमभिसारे मदनमनोहरवेशं ॥ न कुरु नितंबिनि गि

लिताले

ललितैषुनरवलोकनं ८

मन विलंबनमनुसर तं हृदयेशं १ धीरसमीरे यमुनातीरे वसति वने वनमाली ध्रु नामसमे
तं कृतसंकेतं वादयते मृदुवेणुं बहु मनुते ननु ते तनुसंगतपवनचलितमपि रेणुं २ पतति
पत्रे विचलितपत्रे संकितभवदुपयानं रचयति सयनं सचकितनयनं पश्यति तव पंथानं ३
मुखरमधीरं त्यज मंजीरं रिपुमिव केलिसुलोलं चल सखि कुंजं सतिमिरपुंजं सीलय नीलनिचो
लं ४ उरसि मुरारेरुपहितहारे घन इव तरलवलाके तडिदिव पीते रतिविपरीते राजसि सुकृ
तविपाके ५ विगलितवसनं परिहृतरसनं घटय जघनमपिधानं किसलयशयने पंकजन
यने निधिमिव हर्षनिधानं ६ हरिरभिमानी रजनिरिदानीमियमपि विरामं कुरु मम वचनं स याति
त्वररचनं पूरय मधुरिपुकामं ७ श्रीजयदेवे कृतहरिसेवे भणति परमरमणीयं प्रमुदितहृदयं हरि
मतिसदयं नमत सुकृतकमनीयं ८ विकिरति मुहुः स्वासानाशा पुरो मुहुरीक्षते प्रविशति
मुहुः कुंजं गुंजन्मुहुर्बहु ताम्यति रचयति मुहुः शय्यां पर्याकुलं मुहुरीक्षते मदनकदनक्लां

तः कांते प्रियस्तव वर्त्तते १ त्वद्वाम्येन समं समग्रमधुना तिग्मांसुरस्तं गतो गोविंदस्य मनोरथे
न च समं प्राप्तं तमः सांद्रतां कोकानां करुणस्वनेन सदृशी दीर्घा मम प्रार्थना तन्मुग्धे विफलं
विलंबनमसौ रम्योभिसारक्षणः २ आश्लेषादनुचुंबनादनु नखोल्लेखादनु स्वांतजप्रोद्बोधा
दनु संभ्रमादनु रतारंभादनु प्रीतयोः अन्यार्थं गतयोर्भ्रमान्मिलितयोः संभाषणैर्जानतोर्दंप
प्रास्ति त्योरिह को न को न तमसि व्रीडाविमिश्रो रसः ३ सभयचकितं विन्यस्यंती दृशौ तिमिरे पथि प्रतित
रु मुहुः स्थित्वा मंदं पदानि वितन्वतीं कथमपि रहः प्राप्तामंगैरनंगतरंगिभिः सुमुखि सुभग पश्य
न् स त्वामुपैतु कृतार्थतां ४ राधामुग्धमुखारविंदमधुपस्त्रैलोक्यमौलिस्थलीनेपथ्योचितनील
रत्नमवनीभारावतारांतकः स्वच्छंदं व्रजसुंदरीजनमनस्तोषप्रदोषश्चिरं कंसध्वंसनधूमकेतुर
वतु त्वां देवकीनंदनः ५ इति श्रीगीतगोविंदे जयदेवकृतौ साकांक्षपुंडरीकाक्षो नाम पंचमः सर्गः ५
अथ तां गंतुमशक्तां चिरमनुरक्तां लतागृहे दृष्ट्वा तच्चरितं गोविंदे मनसिजमंदे सखी प्राह १

गौडीरागेरूपकताले पश्यतिदिशिदिशिरहसिभवंतं॥ तदधरमधुरमधूनिपिबंतं॥१॥ नाथहरे
१०
सीदतिराधावासगृहे॥ ध्रु॥ त्वदभिसरणरभसेनवलंती॥ पततिपदानिकियंतिचलंती॥२॥ वि
हितविशदबिसकिसलयवलया॥ जीवतिपरमिहतवरतिकलया॥३॥ मुहुरवलोकितमंडन
लीला॥ मधुरिपुरहमितिभावनशीला॥४॥ त्वरितमुपैतिनकथमभिसारं॥ हरिरितिवदतिस
चुंबति
खीमनुवारं॥५॥ श्लिष्यतिजलधरकल्पं हरिरुपगतइतितिमिरमनल्पं॥६॥ भवतिविलंबि
निविगलितलज्जा॥ विलपतिरोदितिवासकसज्जा॥७॥ श्रीजयदेवकवेरिदमुदितं॥ रसिकज
नंतनुतामतिमुदितं॥८॥ विपुलपुलकपालिस्फीतसीत्कारमंतर्जनितजडिमकाकुव्याकुलंव्या
हरंती॥ तवकितवविधायामंदकंदर्पचिंतांरसजलधिनिमग्नाध्यानलग्नामृगाक्षी॥१॥ अंगेष्वा
भरणंकरोतिबहुशः पत्रेपिसंचारिणिप्राप्तंत्वांपरिशंकतेवितनुतेशय्यांचिरंध्यायति॥इ
त्याकल्पविकल्पतल्परचनासंकल्पलीलाशतव्यासक्तापिविनात्वयावरतनुर्नैषानिशांने

ष्यति॥२॥ किंविश्राम्यसिकृष्णभोगिभवनेभांडीरभूमीरुहिभ्रातर्याहिनदृष्टिगोचरमितःसानं
दनंदास्पदं॥ राधायाःवचनंतदध्वगमुखान्नंदांतिकेगोपतोगोविंदस्यजयंतिसायमतिथिप्रा
स्प
स्त्यगर्भागिरः॥३॥ इतिश्रीगीतगोविंदेवासकसज्जावर्णनेनामकधृष्टवैकुंठोनामषष्ठमसर्गः
अत्रांतरेचकुलटाकलटाकुलवर्त्मपातसंजातपातकइवस्फुटलांछनश्रीः॥ वृंदावनांतरमदी
पयदंशुजालैर्दिक्सुंदरीवदनचंदनबिंदुरिंदुः॥१॥ प्रसरतिशशधरबिंबेविहितविलंबेचमाध
वेविधुरा॥ विरचितविविधविलापंसापरितापंचकारोच्चैः॥२॥ मालवरागेमंठमतौ कथितसमये ने
पिहरिरहहनययौवनं॥ ममविफलमिदममलरूपमपियौवनं॥१॥ यामिहेकमिहशरणं
सखीजनवचनवंचिता॥ ध्रु॥ यदनुगमनायनिशिगहनमपिशीलितं॥ तेनममहृदयमिदम
शरकीलितं॥२॥ मममरणमेववरमतिवितथकेतना॥ किमिहविषहामिविरहानलमचेत
ना॥३॥ मामिहहविधुरयतिमधुरमधुयामिनी॥ कापिहरिमनुभवतिकृतकामिनी॥४॥ अह
सुकृत

११ हकलयामि वलयादिमणिभूषणं हरिविरहदहनवहनेन बहुदूषणं ५ कुसुमसुकुमार-
तनुमतनुशरलीलया स्रगपि हृदि हंति मामतिविषमशीलया ६ अहमिह निवसामि नग
णितवनवेतसा ॥ स्मरति मधुसूदनो मामपि न चेतसा ७ हरिचरणशरणजयदेवकविभारती
वसतु हृदि युवतिरिव कोमलकलावती ८ तत्किं कामपि कामिनीमभिसृतः किं वा कलाकेलि
भिर्बद्धो बंधुभिरंधकारिणि वनाभ्यर्णे किमुद्भ्राम्यति कांतः क्लांतमना मनागपि पथि प्रस्थातु
मेवाक्षमः संकेतीकृतमंजुवंजुवंजुललताकुंजे पि यन्नागतः १ अथागतां माधवमंतरेण स
खीमियं वीक्ष्य विषाददमूकां विशंकमाना रमितं कयापि जनार्दनं दृष्टवदेतदाह २ वसंते रागे चपला
एकतालीताले स्मरसमरोचितविरचितवेशा गलितकुसुमदरविलुलितकेशा १ कापि मधु
रिपुणा विलसति युवतिरधिकगुणा ध्रु० हरिपरिरंभणचलितविकारा कुचकलशोप
रितरलितहारा २ विचलकललिताननचंद्रा तदधरपानरभसकृततंद्रा ३ चंचलकुंड
दल•

लललितकपोला मुखरितरसनजघनगतिलोला ४ दयितविलोकितलज्जितहसिता व
हुविधकूजितरतिरसरसिता ५ विपुलपुलकपृथुवेपथुवेपथुवेपथुभंगा श्वसितनि
मीलितविकसदनंगा ६ श्रमजलकणभरसुभगशरीरा परिपतितोरसि रतिरणधीरा
७ श्रीजयदेवभणितहरिरमितं कलिकलुषजनयतु परिशमितं ८ विरहपांडुमुरारिम
खांबुजद्युतिरयं तिरयन्नपि वेदनां विधुरतीव तनोति मनोभुवः सुहृदये हृदये मदनव्य
थां १ गुर्जरीरागेएकतालीताले समुदितमदने रमणीवदने चुंबनवलिताधरे मृगमदतिल ललिता
कं लिखति सपुलकं मृगमिव रजनीकरे १ रमते यमुनापुलिनवने विजयी मुरारिरधु
ना ध्रु० घनचयरुचिरे रचयति चिकुरे तरलिततरुणानने कुरुवककुसुमं चपलासु
षमं रतिपतिमृगकानने २ घटयति सुघने कुचयुगगगने मृगमदरुचिरूषिते मणि
१२ सरममलं तारकपटलं नखपदशशिभूषिते ३ जितबिसशकले मृदुभुजयुगले करतल

नलिनीदले ॥ मरकतवलयंतारकमधुकरनिचयंवितरतिहिमशीतले ॥ ४ ॥ रतिगृहजघने ॥ ७

१२ विपुलापघनेमनसिजकनकासने ॥ मणिमयरसनंतोरणहसनंविकिरतिकतवासने

॥ ५ ॥ चरणकिसलयेकमलानिलयेनखमणिगणपूजिते ॥ बहिरपवरणंयावकभरणंजनय

तिहृदियोजिते ॥ ६ ॥ रमयतिसुदृशंकामपिसुदृशंखलहलधरसोदरे ॥ किमफलमवशंचि

रमिहविरसंवदसखिविटपोदरे ॥ ७ ॥ इहरसभणनेकृतहरिगुणनेमधुरिपुपदसेवके ॥ क

लियुगचरितंनवसतुदुरितंकविनृपजयदेवके ॥ ८ ॥ नायातःसखिनिर्दयोयदिशठस्त्वंदूति

किंदूयसेस्वछंदंबहुवल्लभःसरमतेकिंतत्रतेदूषणं ॥ पश्याद्यप्रियसंगमायदयितस्या

कृष्यमाणंगुणैरुत्कंठार्त्तिभरादिवस्फुटदिदंचेतःस्वयंयास्यति ॥ १ ॥ देशाखरागे ॥ अनिल

तरलकुवलयनयनेन ॥ तपतिनसाकिसलयशयनेन ॥ १ ॥ सखियारमितावनमालिना ॥ ध्रु ॥ वि

प कसितसरसिजललितमुखेन ॥ स्फुटतिनसामनसिजविशिखेन ॥ २ ॥ अमृतमधुरमृदुतरव

चनेन ॥ ज्वलतिनसामलयजपवनेन ॥ ३ ॥ स्थलजलरुहरुचिकरचरणेन ॥ लुठतिनसाहिमक

रकिरणेन ॥ ४ ॥ कनकनिकषरुचिशुचिवसनेन ॥ श्वसितिनसापरिजनहसनेन ॥ ५ ॥ सजलद जल

समुदयरुचिरेण ॥ दहतिनसाहृदिविरहभरेण ॥ ६ ॥ सकलभुवनजनवरतरुणेन ॥ वहति

नसारुजमतिकरुणेन ॥ ७ ॥ श्रीजयदेवभणितरमणेन ॥ प्रविशतुहरिरपिहृदयमनेन ॥ ८ ॥

मनोभवानंदनचंदनानिलप्रसीदरेदक्षिणमुंचवामतां ॥ क्षणंजगत्प्राणविधायमाधवं

पुरोममप्राणहरोभविष्यसि ॥ १ ॥ रिपुरिवसखीसंवासोयंशिखीवहिमानिलोविषमिव

सुधारश्मिर्यस्मिन्दुनोतिमनोगते ॥ हृदयमदयेतस्मिन्नेवंपुनर्वलतेबलात्कुवलयदृशांवा

मःकामोनिकामनिरंकुशः ॥ २ ॥ बाधांविधेहिमलयानिलपंचबाणप्राणान्गृहाणनगृहंपुन

राश्रयिष्ये ॥ किंतेकृतांतभगिनीक्षमयातरंगैरंगानिसिंचममशाम्यतुदेहदाहः ॥ ३ ॥ सांद्रा

नंदपुरंदरादिदिविषद्वृंदैरमंदादरादानम्रैर्मुकुटेंद्रनीलमणिभिःसंदर्शितेंदीवरं ॥ स्वछं

१३

दं मकरंदसुंदरगलन्मंदाकिनीमेदुरं श्रीगोविंदपदारविंदमशुभस्कंदाय वंदामहे ॥ ४ ॥ ॥
इति श्रीगीतगोविंदे जयदेवकृतौ नागरनारायणो नाम सप्तमः सर्गः ॥ ७ ॥ अथ कथमपि या
मिनीं विनीय स्मरशरजर्जरितापि सा प्रभाते ॥ अनुनयविनयं वदंतमग्रे प्रणतमपि प्रि
माह साभ्यसूयं ॥ १ ॥ भैरवरागे यतितालेन रजनीजनितगुरुजागररागकषायितमलसनिमे
षं ॥ वहति नयनमनुरागमिव स्फुटमुदितरसाभिनिवेशं ॥ १ ॥ हरि हरि याहि माधव याहि के
शव मा वद कैतववादं ॥ तामनुसर सरसीरुहलोचन या तव हरति विषादं ॥ ध्रु ॥ कज्जलमलि
नविलोचनचुंबनविरचितनीलिमरूपं ॥ दशनवसनमरुणं तव कृष्ण तनोति तनोरनुरूपं
॥ २ ॥ वपुरनुहरति तव स्मरसंगरखरनखरक्षतरेखं ॥ मरकतशकलकलितकलधौतलिपे
रिव रतिजयलेखं ॥ ३ ॥ चरणकमलगलदलक्तकसिक्तमिदं तव हृदयमुदारं ॥ दर्शयतीव ब
हिर्मदनद्रुमनवकिसलयपरिवारं ॥ ४ ॥ दशनपदं भवदधरगतं मम जनयति चेतसि खे

दं ॥ कथयति कथमधुनापि मया सह तव वपुरेतदभेदं ॥ ५ ॥ बहिरिव मलिनतरं तव कृष्ण मनोपि भविष्य
ति नूनं ॥ कथमथ वंचयसे जनमनुगतमसमशरज्वरदूनं ॥ ६ ॥ भ्रमति भवानबलाकवलाय
वनेषु किमत्र विचित्रं ॥ प्रथयति पूतनिकैव वधूवधनिर्दयबालचरित्रं ॥ ७ ॥ श्रीजयदेवभणितरतिवंचित
खंडितयुवतिविलापं ॥ शृणुत सुधामधुरं विबुधा विबुधालयतोपि दुरापं ॥ ८ ॥ तदेवं पश्यंत्याः प्रसर
दनुरागं बहिरिव प्रियापादालक्तच्छुरितमरुणद्योति हृदयं ॥ ममाद्य प्रख्यातप्रणयभरभंगेन कि
तव त्वदालोकः शोकादपि किमपि लज्जां जनयति ॥ १ ॥ प्रातर्नीलनिचोलमच्युतमुरः संवीतपीतां
शुकं राधायाश्चकितं विलोक्य हसति स्वैरं सखीमंडले ॥ व्रीडाचंचलमंचलं नयनयोराधाय राधानने स्मे
रस्मेरसुखोयमस्तु जगदानंदाय नंदात्मजः ॥ २ ॥ इति श्रीगीतगोविंदे विलक्षलक्ष्मीपतिर्नामाष्ट
मः सर्गः ॥ ८ ॥ तामथ मन्मथखिन्नां रतिरसभिन्नां विषादसंपन्नां ॥ अनुचिंतितहरिचरितां कलहां
तरितामुवाच रहः सखी ॥ १ ॥ गुर्जरीरागे यतितालेन हरिरभिसरति वहति मधुपवने ॥ किमपरमधिकसु

१५

खि
खंसभवने ॥१॥ माधवे माकुरु मानिनि मानमये ॥ ध्रु ॥ तालफलादपि गुरुमतिसरसं ॥ किमु विफलीकु
रुषे कुचकलसं ॥२॥ किमिति विषीदसि रोदिषि विकला ॥ विहसति युवतिसभा तव सकला ॥३॥ कति न
कथितमिदमनुपदमचिरं ॥ मापरिहर हरिमतिसयरुचिरं ॥४॥ जनयसि किमिति गुरुखेदं शृणु मनसि
मम वचनमनीहितभेदं ॥५॥ सजलनलिनीदलशीतलशयने ॥ हरिमवलोकय सफलय नयने ॥६॥ ह
रिरुपयातु वदतु बहु मधुरं ॥ किमिति करोषि हृदयमति विधुरं ॥७॥ श्रीजयदेवभणितमतिललि
तं ॥ सुखयतु रसिकजनं हरिचरितं ॥८॥ स्निग्धे यत्परुषासि यत्प्रणमति स्तब्धासि यद्रागिणि
द्वेषस्थासि यदुन्मुखे विमुखतां यातासि तस्मिन्प्रिये ॥ तद्युक्तं विपरीतकारिणि तव श्रीखंडचर्चा
विषं शीतांशुस्तपनो हिमं हुतवहः क्रीडामुदो यातना ॥१॥ अंतर्मोहनमौलिघूर्णनचलन्मंदारविस्रंस
नस्तब्धाकर्षणदृष्टिहर्षणमहामंत्रः कुरंगीदृशां ॥ दृप्यद्दानवदूयमानदिविषद्दुर्वा
रदुःखापदां भ्रंशः कंसरिपोर्व्यपोहयतु वोश्रेयांसि वंशीरवः ॥२॥ इति श्रीगीतगोविंदे जयदेवकृ

तौ मुग्धमुकुंदो नाम नवमः सर्गः ॥ अत्रांतरे मसृणरोषवशामसीमनिःश्वासनिःसहमुखीं सुमुखी
मुपेत्य ॥ सव्रीडमीक्षितसखीवदनां प्रदोषे सानंदगद्गदपदं हरिरित्युवाच ॥१॥ गुर्जरीरागेण एकतालीतालेन ॥
वदसि यदि किंचिदपि दंतरुचिकौमुदी हरति दरतिमिरमतिघोरं ॥ स्फुरदधरसीधवे तव वदनचंद्रमा
रोचयति लोचनचकोरं ॥१॥ प्रियेचारुशीले मुंच मयि मानमनिदानं ॥ सपदि मदनानलो दहति मम
मानसं देहि मुखकमलमधुपानं ॥ ध्रु ॥ सत्यमेवासि यदि सुदति मयि कोपिनी देहि खरनखरशर
घातं ॥ घटय भुजबंधनं जनय रदखंडनं येन वा भवति सुखजातं ॥२॥ त्वमसि मम जीवनं त्वमसि म
म भूषणं त्वमसि मम भवजलधिरत्नं ॥ भवतु भवतीह मयि सततमनुरोधिनी तत्र मम जीवहृदय
मतियत्नं ॥३॥ नीलनलिनाभमपि तन्वि तव लोचनं धारयति कोकनदरूपं ॥ कुसुमशरबाणभा
वेन यदि रंजयसि कृष्णमिदमेतदनुरूपं ॥४॥ स्फुरतु कुचकुंभयोरुपरि मणिमंजरी रंजयतु
तव हृदयदेशं ॥ रसतु रसनापि तव घनजघनमंडले घोषयतु मन्मथनिदेशं ॥५॥ स्थलकम

१५

लगंजनं मम हृदयरंजनं जनितरतिरंगपरभागं ।। भणमसृणवाणि करवाणि
चरणद्वयं सरसलसदलक्तकरागं ।। ६ स्मरगरलखंडनं मम शिरसि मंडनं देहि पदपल्लवमुदा
रं ।। ज्वलति मयि दारुणो मदनकदनानलो हरतु तदुपाहितविकारं ।। ७ ।। इति चटुलचाटुपटुचारु
मुरवैरिणो राधिकामधिवचनजातं ।। जयति पद्मावतीरमणजयदेवकविभारतिभणितमतिशा
तं ।। ८ ।। परिहर कृतातंके शंकां त्वया सततं घनस्तनजघनयाक्रांते स्वांते परानवकाशिनि ।। वि
शति वितनोरन्यो धन्यो धन्यो न कोपि मम अंतरं प्रणयिनि परिरंभारंभे विधेहि विधेयतां ।। १ ।। व्यथ
यति वृथा मौनं तन्वि प्रपंचय पंचमं तरुणि मधुरालापैस्तापं विनोदय दृष्टिभिः ।। सुमुखि विमुखि
भावं तावद्विमुंच न मुंच मां स्वयमतिशयस्निग्धो मुग्धे प्रियोयमुपस्थितः ।। २ ।। स्मितमुखि नवभांति
भंगुरभ्रूर्युवजनमोहनकरालकालसर्पी ।। तदुदितभयभंजनाय यूनां त्वदधरसीधुसुधैव सि
द्धमंत्रः ।। ३ ।। बंधूकद्युतिबांधवोयमधरः स्निग्धो मधूकछविर्गंडश्चंडि चकास्ति नीलनलिनश्रीमो

गी

चनं लोचनं ।। नासाभ्येति तिलप्रसूनपदवीं कुंदाभदंति प्रिये प्रायस्त्वन्मुखसेवया विजयते वि
श्वं स पुष्पायुधः ।। ४ ।। दृशौ तव मदालसे वदनमिंदुसंदीपनं गतिर्जनमनोरमा विजितरंभमूरु
द्वयं ।। रतिस्तव कलावती रुचिरचित्रलेखे भ्रुवावहो विबुधयौवनं वहसि तन्वि पृथ्वीगता ।। ५ ।। मु
ग्धे विधेहि मयि निर्दयदंतदंशदोर्वल्लिबंधनिबिडस्तनपीडनानि ।। चंडि त्वमेव मुदमुंच न पं
चबाणचंडालकांडदलनादसवः प्रयांति ।। ६ ।। प्रीतिं वस्तनुतां हरिः कुवलयापीडेन सार्द्धं रणे
राधापीनपयोधरस्मरणकृत्कुंभेन संभेदवान् ।। यस्मिन्स्विद्यति मीलति क्षणमिव क्षिप्ते द्विपे
तत्क्षणात्कंसस्यालमभूज्जितं जितमिति व्यामोहकोलाहलः ।। ७ ।। इति श्रीगीतगोविंदे चतुरच
तुर्भुजो नाम दशमः सर्गः ।। श्री सुचिरमनुनयेन प्रीणयित्वा मृगाक्षीं गतवति कृतवेशे केशवे कुंजशय्यां ।। र
चितरुचिरभूषां दृष्टिमोषे प्रदोषे स्फुरति निरवसादां कापि राधां जगाद ।। १ ।। वसंतरागे यतितालेन
।। विरचितचाटुवचनरचनं चरणे रचितप्रणिपातं ।। संप्रति मंजुलवंजुलसीमनि केलिशय

१६

नमनुज्ञातं ॥२॥ मुग्धे मधुमथनमनुगतमनुसर राधिके ॥ध्रु॥ घनजघनस्तनभारभरे दरमं
थरचरणविहारं ॥ मुखरितमणिमंजीरमुपैहि विधेहि मरालविकारं ॥२॥ शृणु रमणीयतरं त
रुणीगणमोहनमधुरिपुरावं ॥ कुसुमशरासनशासनवंदिनि पिकनिकरे भज भावं ॥३॥ अनिल
तरलकिशलयनिकरेण करेण लतानिकुरंबं ॥ प्रेरणमिव करभोरु करोति गतिं प्रति मुंच वि
लंबं ॥४॥ स्फुरितमनंगतरंगवशादिव सूचितहरिपरिरंभं ॥ पृच्छ मनोहरहारविमलजलधा
रममुं कुचकुंभं ॥५॥ अधिगतमखिलसखीभिरिदं तव वपुरपि रतिरणसज्जं ॥ चंडि रसि
तरसनारवडिंडिममभिसर सरसमलज्जं ॥६॥ स्मरशरसुभगनखेन सखीमवलंब्य करेण
सलीलं ॥ चल वलयक्वणितैरवबोधय हरिमपि निजगतिशीलं ॥७॥ श्रीजयदेवभणितमधुरी
कृतहारमुदासितवामं ॥ हरिविनिहितमनसामधितिष्ठतु कंठतटीमविरामं ॥८॥ सा मां द्रक्ष्य
ति वक्ष्यति स्मरकथां प्रत्यंगमालिंगनैः प्रीतिं यास्यति रंस्यते सखि समागत्येति चिंताकुलः

स त्वां पश्यति वेपते पुलकयत्यानंदति स्विद्यति प्रत्युद्गच्छति मूर्छति स्थिरतमःपुंजे निकुंजे प्रिय
ः ॥१॥ अक्ष्णोर्निक्षिपदंजनं श्रवणयोस्तापिच्छगुच्छावलीं मूर्ध्नि श्यामसरोजदाम कुचयोः कस्तु
रिकापत्रकं ॥ धूर्तानामभिसारसत्वरहृदां विष्वग्निकुंजे सखि ध्वांते नीलनिचोलचारु सुद
शां प्रत्यंगमालिंगति ॥२॥ काश्मीरगौरवपुषामभिसारिकाणामाबद्धरेखमभितो रुचिमंजरि
भिः ॥ एतत्तमालदलनीलतमं तमिस्रं तत्प्रेमहेमनिकषोपलतां तनोति ॥३॥ हारावलीतरलकां
चनकांचिदाममंजीरकंकणमणिद्युतिदीपितस्य ॥ द्वारे निकुंजनिलयस्य हरिं निरीक्ष्य व्रीडा
वतीमथ सखीमियमित्युवाच ॥४॥ वराडीरागे मंठताले ॥ मंजुतरकुंजतलकेलिसदने ॥ प्र
विश राधे माधवसमीपमिह विलस रतिरभसहसितवदने ॥१॥ नवभवदशोकदलशयन
सारे ॥ प्रविश राधे माधवसमीपमिह विलस कुचकलशतरलहारे ॥२॥ कुसुमचयरचितशु
चिवासगेहे ॥ प्रविश राधे माधवसमीपमिह विलस कुसुमसुकुमारदेहे ॥३॥ चलमलयवन

उसन्द

१७ पवनसुरभिशीते ॥ प्रविश राधे माधवसमीपमिह विलसरसवलितललितगीते ॥ ४ ॥ विततबहु
वल्लिनवपल्लवघने ॥ प्रविश राधे माधवसमीपमिह विलस चिरमलसपीनजघने ॥ ५ ॥ म
धुमुदितमधुपकुलकलितरावे ॥ प्रविश राधे माधवसमीपमिह विलस मदनशररसस
भावे ॥ ६ ॥ मधुरतरपिकनिकरनिनदमुखरे ॥ प्रविश राधे माधवसमीपमिह विलसदशनरु
चिरुचिरशिखरे ॥ ७ ॥ विहितपद्मावतीसुखसमाजे ॥ कुरु मुरारे मंगलशतानि भणति जय
देवकविराजराजे ॥ ८ ॥ त्वां चित्ते न चिरं वहन्नयमतिश्रान्तो भृशं तापितः कंदर्पेण च पातुमिच्छा
ति सुधासंवाधविंबाधविंबाधरं ॥ अस्यांकं तदलंकुरु क्षणमिह भ्रूक्षेपलक्ष्मीलवक्रीते दास
इवोपसेवितपदांभोजे कुतः संभ्रमः ॥ १ ॥ सा ससाध्वससानंदं गोविंदे लोललोचना ॥ सिंजा
नामंजुमंजीरं प्रविवेश निवेशनं ॥ २ ॥ वराडीरागे रूपकताले ॥ राधावदनविलोकनविकसित
विविधविकारविभंगं ॥ जलनिधिमिव विधुमंडलदर्शनतरलिततुंगतरंगं ॥ १ ॥ हरिमेकर हक चिर

सं चिरमभिलषितविलासं ॥ सा ददर्श गुरुहर्षवशंवदवदनमनंगनिवासं ॥ १ ॥ हारममलतरमु
रसि दधतं परिरम्य विदूरं ॥ स्फुटतरफेनकदंबकरंबितमिव यमुनाजलपूरं ॥ २ ॥ श्यामलमृदुलक
लेवरमंडलमधिगतगौरदुकूलं ॥ नीलनलिनमिव पीतपरागपटलतरवलयितमूलं ॥ ३ ॥ तरल
दृगंचलचलनमनोहरवदनजनितरतिरागं ॥ स्फुटकमलोदरखेलितखंजनयुगमिव शरदि
तडागं ॥ ४ ॥ वदनकमलपरिशीलनमिलितमिहिरसमकुंडलशोभं ॥ स्मितरुचिरुचिरसमुल्ल
सिताधरपल्लवकृतरतिलोभं ॥ ५ ॥ शशिकिरणच्छुरितोदरजलधरसुंदरसकुसुमकेशं ॥ ति
मिरोदितविधुमंडलनिर्मलमलयजतिलकनिवेशं ॥ ६ ॥ विपुलपुलकभरदंतुरितं रतिकेलिक
लाभिरधीरं ॥ मणिगणकिरणसमूहसमुज्ज्वलभूषणसुभगशरीरं ॥ ७ ॥ श्रीजयदेवभणितवि
भवद्विगुणीकृतभूषणभारं ॥ प्रणमत हृदि विनिधाय हरिं सुचिरं सुकृतोदयसारं ॥ ८ ॥ अतिक्र
म्यापांगश्रवणपथपर्यंतगमनप्रयासेनैवाक्ष्णोस्तरलतरतारं पतितयोः ॥ इदानीं राधा

१९ याः प्रियतमसमालोकसमये पपात स्वेदांबुप्रसार इव हर्षाश्रुनिकरः ॥१॥ व्रजंत्यास्तस्यांतं कृत
कयत्कंडूतिपिहितस्मिते यांते गेहाद्बहिरवहितालीपरिजने ॥ प्रियास्यं पश्यंत्याः स्मरशरसमा
कूतसुभगं सलज्जापि व्यगमदिव दूरं मृगदृशः ॥२॥ जयश्रीविन्यस्तैर्महित इव मंदारकुसुमैः स्व
यं सिंदूरेण द्विपरणमुदा मुद्रित इव ॥ भुजापीडः क्रीडाहतकुवलयापीडकरिणः प्रकीर्णासृ
ग्बिंदुर्जयति भुजदंडो मुरजितः ॥३॥ ॥इति श्रीगीतगोविंदे जयदेवकृतौ सानंदगोविंदो नामेकाद
शः सर्गः ॥ ॥ ॥ ॥गतवति सखीवृंदे मंदत्रपाभरनिर्भरस्मरपरवशाकूतस्फीतस्मि
तस्नपिताधरां सरसमनसं दृष्ट्वा राधां मुहुर्नवपल्लवप्रसरैःशयने निक्षिप्ताक्षीमुवाच हरि
प्रियां ॥१॥ रामकेलीरागेण एकतालीताले किसलयशयनतले कुरु कामिनि चरणकमलविनिवेशं
तव पदपल्लववैरिपराभवमिदमनुभवतु सुवेशं ॥१॥ क्षणमधुना नारायणमनुगतमनुभ
ज राधिके ॥ध्रु॥ करकमलेन करोमि चरणमहमागमितासि विदूरं ॥ क्षणमुपकुरु शयनो

परिमामिव नूपुरमनुगतशूरं ॥२॥ वदनसुधानिधिगलितममृतमिव रचय वचनमनुकूलं
विरहमिवापनयामि पयोधररोधकमुरसि दुकूलं ॥३॥ प्रियपरिरंभणरभसवलितमिव पु
५ लकितमतिदुरवापं ॥ मृदुरसि कुचकलसं विनिवेशय शोषय मनसिजतापं ॥४॥ अधरसु
धारसमुपनय भामिनि जीवय मृतमिव दासं ॥ त्वयि विनिहितमनसं विरहानलदग्धवपुषम
विलासं ॥५॥ शशिमुखि मुखरय मणिरसनागुणमनुगुणकंठनिनादं श्रुतियुगले पि
करुतिविकले ममशमय चिरादवसादं ॥६॥ मामतिविफलरुषा विकलीकृतमवलोकितुम
धुनेदं ॥ मीलितलज्जितमिव नयनं तव विरम विसृज रतिखेदं ॥७॥ श्रीजयदेवभणितमिदम
नुपदनिगदितमधुरिपुमोदं ॥ जनयतु रसिकजनेषु मनोरमरतिरसभावविनोदं ॥८॥ प्रत्यू
हः पुलकांकुरेण निविडाश्लेषे निमेषेण च क्रीडाकूतविलोकनेऽधरसुधापाने कथानर्मभिः ॥ आ
नंदाधिगमेन मन्मथकलायुद्धेऽपि यस्मिन्नभूदुद्भूतः स तयोर्बभूव सुरतारंभः प्रियंभावुकः ॥१॥ दो

१८

र्गे संगमितः पयोधरभरेणापीडितः पाणिजैराविद्धो दशनैः क्षताधरपुटः श्रोणीतटेनाहतः हस्ते
ना नमितः कचेधरसुधापानेन संमोहितः कांतः काम पि तृप्तिमाप तदहो कामस्य वामा गतिः २ मी
लत दृष्टि मीलत्कपोलपुलकं सीत्कारधारावमाद्व्यक्ताकुलकेलिकाकु विकसद्दंतांशुधौताधरं ॥
श्वासोतुंगपयोधरोपरिपरिष्वंगी कुरंगीदृशो हर्षोत्कर्षवियुक्तनिःसहः तनोर्द्धन्योधयत्याननं ३
मारांके रतिकेलिसंकुलरणारंभे तया साहसप्रायं कांतजयाय किंचिदुपरि प्रारंभि यत्संभ्रमात् नि
ष्पंदा जघनस्थली शिथिलिता दोर्वल्लिरुत्कंपितं वक्षो मीलितमक्षि पौरुषरसः स्त्रीणां कुतः सिद्ध्यति ४
तस्या पाटलपाणिजांकितमुरो निद्राकषाये दृशौ निर्धूताधरशोणिमा विलुलितस्रस्तस्रजो मूर्द्धजाः
कांचिद्दामदरश्लथा च लमिति प्रातर्निघातैर्दृशोरेभिः कामशरैस्तदद्भुतमभूत्पत्युर्मनः कीलितं ५
आलोलः केशपाशस्तरलितमलकैः स्वेदलोलौ कपोलौ दष्टा बिंबाधरश्रीः कुचकलशरुचा हार यु
ष्टिः ॥ कांचिकांचिद्गताशां स्तनजघनपदं पाणिनाछाद्य सद्यः पश्यंती सत्रपं मां तदपि विलुलितस्रग्धरे

येधिनोति ॥ ध ॥ थ्य कांतंरतिश्रांतमपमंडनवांछया ॥ निजगाद निराबाधा स्वाधीनभर्तृका ७ इति
मनस्यानिगदंतं सुरंतां ते सानितांताखिन्नांगी ॥ राधाजगाद सादरमिदमानंदेन गोविंद ॥ ८ ॥ रामकेलि
रागे ॥ कुरु यदुनंदन चंदनशिशिरतरेण करेण पयोधरे ॥ मृगमदपत्रकमत्र मनोभवमंगलकलश
सहोदरे ॥ १ ॥ निजगाद सा यदुनंदने क्रीडति हृदयानंदने ॥ ध्रु ॥ अलिकुलगंजनमंजनकं रतिनायक
सायकमोचने ॥ त्वदधरचुंबनलंबितकज्जलमुज्वलय प्रियलोचने ॥ २ ॥ नयनकुरंगतरंगविकासनि
रासकरे श्रुतिमंडले ॥ मनसिजपाशविलासधरे सुभवेशनिवेशय यैकुंडले ॥ ३ ॥ भ्रमरचयं रचयंतमु
परि रुचिरं म मसन्मुखे ॥ जितकमले विमले परिकर्मय नर्मजनकमलकं मुखे ॥ ध ॥ मृगमदरसव
लितं ललितं कुरु तिलकमलकरजनीकरे ॥ विहितकलंककलंकमलानन विश्रमितश्रमशीकरे ॥ ५
मम रुचिरे चिकुरे कुरु मानद मनसिजध्वजचामरे ॥ रतिगलिते ललिते कुसुमानि शिखंडिशिखंड
डकडामरे ॥ ६ ॥ सरसघनेजघने मम शंवरदारणवारणकंदरे ॥ मणिरसनावसनाभरणानि शुभाशा

यवाग्मयसुंदरे ७ श्रीजयदेववचसि जयदेहृदयंसरयंकुरुमंडने हरिचरणस्मरणामृतकृतकलिक-
लुषज्वरसंज्वरसखंडने ॥ ८ ॥ रचय कुचयोः पत्रं चित्रं कुरुष्व कपोलयोर्घटय जघने कांचीमंचस्रजा
कबरीभरं ॥ कालयवलयंश्रेणीपाणौ पदे कुरु नूपुराविति निगदितः प्रीतपीतांबरोपि तथाक-
रोत् ॥ १ ॥ त्वामप्राप्य मयिस्वायंवरपरांक्षीरोदतीरोदरे शंके सुंदरि कालकूटमपिबन्मूढो मृडा-
नीपतिः ॥ इत्थं पूर्वकथाभिरन्यमनसो विक्षिप्य वक्षोंचलं राधायास्तनकोरकोपरि मिलन्नेत्रो
हरिः पातु वः ॥ २ ॥ पर्यंकीकृतनागनायकफणाश्रेणीमणीनां गणैः संक्रांतप्रतिबिंबसंवलनया
बिभ्रद्विभुप्रक्रियां ॥ पादांभोरुहधारिवारिधिसुतामक्ष्णां दिदृक्षुः शतैः कायव्यूहमिवाचरन्नुप-
चिताकूतो हरिः पातु वः ॥ ३ ॥ यद्गांधर्वकलासु कौशलमनुध्यानं च यद्वैष्णवं यच्छृंगारविवेकतत्व-
मपि यत्काव्येषु लीलायितं ॥ तत्सर्वं जयदेवपंडितकवेः कृष्णैकतानात्मनः सानंदाः परिसोधयं-
तु सुधियः श्रीगीतगोविंदतः ॥ ४ ॥ साध्वी माध्वीक चिंता न भवति भवतः सर्करे कर्कशासि द्राक्षे दं

तिकोत्वाममृतमसिक्षीरनीररसस्ते ॥ श्रीभोजदेवे माकंदक्रंदकांताधरधरणितलगच्छयच्छंतिया
वद्भावंशृंगारसारस्वतमिहजयदेवस्यविष्वग्वचांसि ॥ १ ॥ श्रीभोजदेवप्रभवस्यरामादेवीसुत
श्रीजयदेवकस्य ॥ पाराशरादिप्रियबंधुकंठे श्रीगीतगोविंदकवित्वमस्तु ॥ २ ॥ ॥ इति श्री
गीतगोविंदे महाकाव्ये श्रीजयदेवकृतौ सुप्रीतपीतांबरोनाम द्वादशः सर्गः संपूर्णः ॥

मेव्ययेत्रमा [illegible] ळेओमित्रेचाछमेकुमे
।वृध्यायावरन [illegible] यरस्यचवश्योरथा।।

```
[OrderDescription]
,CREATED=28.08.19 13:59
,TRANSFERRED=2019/08/28 at 14:06:46
,PAGES=22
,TYPE=STD
,NAME=S0001588
,Book Name=M-701-GEETGOVINDAM
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,
```